श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकोनत्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनत्रिंशः सर्गः ॥

## रावणस्य देवसेनामध्यतो निर्गमनं तं निग्रहीतुं देवानां प्रयत्नो मेघनादेन माययेन्द्रस्य निग्रहणं विजयमुपेतस्य तस्य सेनया सह लङ्कां प्रति प्रस्थानम्

ततस्तमसि सञ्जाते सर्वे ते देवराक्षसाः।
अयुद्ध्यन्त बलोन्मत्ताः सूदयन्तः परस्परम्॥ **7.29.1** ॥

ततस्तु देवसैन्येन राक्षसानां बृहद् बलम्।
दशांशं स्थापितं युद्धे शेषं नीतं यमक्षयम्॥ **7.29.2** ॥

तस्मिंस्तु तामसे युद्धे सर्वे ते देवराक्षसाः।
अन्योन्यं नाभ्यजानन्त युद्ध्यमानाः परस्परम्॥ **7.29.3** ॥

इन्द्रश्च रावणश्चैव रावणिश्च महाबलः।
तस्मिंस्तमोजालवृते मोहमीयुर्न ते त्रयः॥ **7.29.4** ॥

स तु दृष्ट्वा बलं सर्वं रावणो निहतं क्षणात्।
क्रोधमभ्यगमत् तीव्रं महानादं च मुक्तवान्॥ **7.29.5** ॥

क्रोधात् सूतं च दुर्धर्षः स्यन्दनस्थमुवाच ह।
परसैन्यस्य मध्येन यावदन्तो नयस्व माम्॥ **7.29.6** ॥

अद्यैतान् त्रिदशान् सर्वान् विक्रमैः समरे स्वयम्।
नानाशस्त्रमहासारैर्नयामि यमसादनम्॥ **7.29.7** ॥

अहमिन्द्रं वधिष्यामि धनदं वरुणं यमम्।
त्रिदशान् विनिहत्याशु स्वयं स्थास्याम्यथोपरि॥ **7.29.8** ॥

विषादो नैव कर्तव्यः शीघ्रं वाहय मे रथम्।
द्विः खलु त्वां ब्रवीम्यद्य यावदन्तं नयस्व माम्॥ **7.29.9** ॥

अयं स नन्दनोद्देशो यत्र वर्तावहे वयम्।
नय मामद्य तत्र त्वमुदयो यत्र पर्वतः॥ **7.29.10** ॥

तस्य तद् वचनं श्रुत्वा तुरगान् स मनोजवान्।
आदिदेशाथ शत्रूणां मध्येनैव च सारथिः॥ **7.29.11** ॥

तस्य तं निश्चयं ज्ञात्वा शक्रो देवेश्वरस्तदा।
रथस्थः समरस्थस्तान् देवान् वाक्यमथाब्रवीत्॥ **7.29.12** ॥

सुराः शृणुत मद्वाक्यं यत् तावन्मम रोचते।
जीवन्नेव दशग्रीवः साधु रक्षो निगृह्यताम्॥ **7.29.13** ॥

एष ह्यतिबलः सैन्ये रथेन पवनौजसा।
गमिष्यति प्रवृद्धोर्मिः समुद्र इव पर्वणि॥ **7.29.14** ॥

नह्येष हन्तुं शक्योऽद्य वरदानात् सुनिर्भयः।
तद् ग्रहीष्यामहे रक्षो यत्ता भवत संयुगे॥ **7.29.15** ॥

यथा बलौ निरुद्धे च त्रैलोक्यं भुज्यते मया।
एवमेतस्य पापस्य निरोधो मम रोचते॥ **7.29.16** ॥

ततोऽन्यं देशमास्थाय शक्रः सन्त्यज्य रावणम्।
अयुध्यत महाराज राक्षसांस्त्रासयन् रणे॥ **7.29.17**॥

उत्तरेण दशग्रीवः प्रविवेशानिवर्तकः।
दक्षिणेन तु पार्श्वेन प्रविवेश शतक्रतुः॥ **7.29.18**॥

ततः स योजनशतं प्रविष्टो राक्षसाधिपः।
देवतानां बलं सर्वं शरवर्षैरवाकिरत्॥ **7.29.19**॥

ततः शक्रो निरीक्ष्याथ प्रणष्टं तु स्वकं बलम्।
न्यवर्तयदसम्भ्रान्तः समावृत्य दशाननम्॥ **7.29.20**॥

एतस्मिन्नन्तरे नादो मुक्तो दानवराक्षसैः।
हा हताः स्म इति ग्रस्तं दृष्ट्वा शक्रेण रावणम्॥ **7.29.21**॥

ततो रथं समास्थाय रावणिः क्रोधमूर्च्छितः।
तत् सैन्यमतिसङ्क्रुद्धः प्रविवेश सुदारुणम्॥ **7.29.22**॥

तां प्रविश्य महामायां प्राप्तां पशुपतेः पुरा।
प्रविवेश सुसंरब्धस्तत् सैन्यं समभिद्रवत्॥ **7.29.23**॥

स सर्वा देवतास्त्यक्त्वा शक्रमेवाभ्यधावत।
महेन्द्रश्च महातेजा नापश्यच्च सुतं रिपोः॥ **7.29.24**॥

विमुक्तकवचस्तत्र वध्यमानोऽपि रावणिः।
त्रिदशैः सुमहावीर्यैर्न चकार च किञ्चन॥ **7.29.25**॥

स मातलिं समायान्तं ताडयित्वा शरोत्तमैः।
महेन्द्रं बाणवर्षेण भूय एवाभ्यवाकिरत्॥ **7.29.26**॥

ततस्त्यक्त्वा रथं शक्रो विससर्ज च सारथिम्।
ऐरावतं समारुह्य मृगयामास रावणिम्॥ **7.29.27**॥

स तत्र मायाबलवानदृश्योऽथान्तरिक्षगः।
इन्द्रं मायापरिक्षिप्तं कृत्वा स प्राद्रवच्छरैः॥ **7.29.28**॥

स तं यदा परिश्रान्तमिन्द्रं जज्ञेऽथ रावणिः।
तदैनं मायया बद्ध्वा स्वसैन्यमभितोऽनयत्॥ **7.29.29**॥

तं तु दृष्ट्वा बलात् तेन नीयमानं महारणात्।
महेन्द्रममराः सर्वे किं नु स्यादित्यचिन्तयन्॥ **7.29.30**॥

दृश्यते न स मायावी शक्रजित् समितिञ्जयः।
विद्यावानपि येनेन्द्रो माययापहृतो बलात्॥ **7.29.31**॥

एतस्मिन्नन्तरे क्रुद्धाः सर्वे सुरगणास्तदा।
रावणं विमुखीकृत्य शरवर्षैरवाकिरन्॥ **7.29.32**॥

रावणस्तु समासाद्य आदित्यांश्च वसूंस्तदा।
न शशाक स सङ्ग्रामे योद्धुं शत्रुभिरर्दितः॥ **7.29.33**॥

स तं दृष्ट्वा परिम्लानं प्रहारैर्जर्जरीकृतम्।
रावणिः पितरं युद्धेऽदर्शनस्थोऽब्रवीदिदम्॥ **7.29.34**॥

आगच्छ तात गच्छामो रणकर्म निवर्तताम्।
जितं नो विदितं तेऽस्तु स्वस्थो भव गतज्वरः॥ **7.29.35**॥

अयं हि सुरसैन्यस्य त्रैलोक्यस्य च यः प्रभुः।
स गृहीतो देवबलाद् भग्नदर्पाः सुराः कृताः॥ **7.29.36**॥

यथेष्टं भुङ्क्ष्व लोकांस्त्रीन् निगृह्यारातिमोजसा।
वृथा किं ते श्रमेणेह युद्धमद्य तु निष्फलम्॥ **7.29.37** ॥

ततस्ते दैवतगणा निवृत्ता रणकर्मणः।
तच्छ्रुत्वा रावणेर्वाक्यं शक्रहीनाः सुरा गताः॥ **7.29.38** ॥

अथ रणविगतः स उत्तमौजा -
त्रिदशरिपुः प्रथितो निशाचरेन्द्रः।
स्वसुतवचनमादृतः प्रियं तत्
समनुनिशम्य जगाद चैव सूनुम्॥ **7.29.39** ॥

अतिबलसदृशैः पराक्रमैस्त्वं
मम कुलवंशविवर्धनः प्रभो।
यदयमतुल्यबलस्त्वयाद्य वै
त्रिदशपतिस्त्रिदशाश्च निर्जिताः॥ **7.29.40** ॥

नय रथमधिरोप्य वासवं नगर -
मितो व्रज सेनया वृतस्त्वम्।
अहमपि तव पृष्ठतो द्रुतं
सह सचिवैरनुयामि हृष्टवत्॥ **7.29.41** ॥

अथ स बलवृतः सवाहन -
स्त्रिदशपतिं परिगृह्य रावणिः।
स्वभवनमधिगम्य वीर्यवान्
कृतसमरान् विससर्ज राक्षसान्॥ **7.29.42** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनत्रिंशः सर्गः॥